संस्कृत.

क्र. १५

(३५)

स्मार्त

पंचायतनादिविधि:

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्रीगणेशाय नमः ॥ पंचायतन प्रकार ॥ शिल्पशास्त्रे ॥ सनत्कुमारसंहितायां सूर्यः ॥ अर्क

श्री - विष्णुश्चैव सर्वेश्च देवी विघ्नेश्वरस्तथा । एकोहं पंचधा जातो नर्तयेत्सूत्रधारो यथा ॥१॥ नर्तये

(1) नाटकं शास्त्रे यथा सूत्रधारः ॥ पुराणांतरे ॥ सूर्यमंडलएव सर्वेषां देवानां पूजनोक्तः ॥ पुनस्तत्रैव ।

मुख्यपूजाविधानां तु कर्तव्यं सूर्यमंडले । अप्रत्यक्षाः सर्वदेवाः प्रत्यक्षो भगवान्रविः ॥२॥

सर्वेषां मे रनेत्रोयं जगज्जीवस्मृते मतं ॥ एतदंशसमुद्भूताः रुद्राद्याः सर्वदेवताः ३॥

प्रत्यक्षो भगवानेष चतुर्वेदे युगी यतो सर्वे देवाः कालवशाः कालः कालो दिवाकरः ॥४

एतस्य मंडले पूज्याः सर्वे देवाः प्रयत्नतः ॥ एतदाराधनोद्भाकः प्रतिमां पूजयेन्नरः ॥५॥

प्रतिमातोधिकं पुण्यं ब्राह्मणस्य तु पूजने । अचिरो गसुधियो वा ब्राह्मणो मामकी तनुः ॥६॥

इति ॥ सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतेः ॥ शंभौ मध्यगते हरीनहरभूदेव्यो हरौ शंकरे

भास्वे नागसुतारयो हरगणेशाजा शिकाः स्थापिताः ॥ देव्यां विष्णुहरेभवल्लकरवयो लंबोदरे

नेश्वरे ॥ नार्यः शंकरवामतो ऽ ध्ववु भ [illegible] कारत्तुं नेहनिदाः ॥७॥ अस्यार्थः ॥ यदेशे

देवे शंभो मध्ये स्थापिते सति देवस्य वामतः इर्यमैनेन पूजकस्य दक्षिणतो निऋतिक्रमे

ण हरिसूर्यगणेशोमाः स्थापनीयाः ॥ इति शिवपंचायतनं ॥ हरौ नारायणे मध्ये स्थिते दे

वे स्थापिते सति देवस्य वामक्रमेण पूजकस्याग्निकूलि दिशामारभ्य शंकरगणेशसूर्याभवा

न्यः स्थापनीयाः ॥ इति विष्णुपंचायतनं ॥ रवौ सूर्ये मध्यगते सति देवस्य वामतः पूज

कस्यानिऋतिमारभ्य शिवगणेशविष्णुमाः स्थापनीयाः ॥ शेषं पूर्ववत् ॥ विज्ञेयं ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

तदुक्तं ॥ यदा तु शंकरं मध्ये ईशान्यां श्रीपतिं जयेत् ॥ आग्नेय्यां च तथा हेरंबं नैरृत्यां पार्व
तीसुतं ॥ वायव्यां तु सदा पूज्या भवानि भक्तवत्सला ॥ यदा तु मध्ये गोविंदं चेशान्यां शं
करं यजेत् ॥ आग्नेय्यां गणनाथं च नैरृत्यां तपनं यजेत् ॥ वायव्यां अंबिकां चैव यजेन्नि
त्यसमाहितैः ॥ १० ॥ सहस्रांशुं यदा मध्ये ईशान्यां पार्वतीपतिं ॥ आग्नेय्यां मेकदंतं च नैरृ
त्यां मच्युतं तथा ॥ ११ ॥ वायव्यां पूजयेद्देवीं भोगमोक्षैकभूमिकां ॥ भवानी तु यदा मध्ये ई
शान्यां माधवं यजेत् ॥ १२ ॥ आग्नेय्यां पार्वतीनाथं नैरृत्यां गणनायकं ॥ प्रद्योतनं तु वाय
व्यामाचार्यस्तु प्रपूजयेत् ॥ १३ ॥ हेरंबं तु यदा मध्ये ईशान्यामच्युतं यजेत् ॥ आग्नेय्यां पंचव
क्रं च नैरृत्यां जगदंबिकां ॥ १४ ॥ वायव्यामंशुमालिं च यजेन्मंत्रोघतोद्विजैः स्वस्थानवर्जिता
देवाः शोकदुःखभयप्रदाः ॥ १५ ॥ अथ प्राचीलक्षणं ॥ देवतामुखमारभ्य दिशां प्राचीं प्रक
ल्पयेत् ॥ तदादिपरिवाराणां मंगाद्या व स्थानस्थितं ॥ अनुक्रमेण प्रत्येकं तेषु क्रमेण महत्पूर्वं
प्रपूजकः यामध्ये प्राचीप्रोक्ता विचक्षणैः ॥ १ ॥ इति पंचायतनविधिः ॥

| | | | | |
|---|---|---|---|---|
| गणेश    उमा | गणेश    सूर्य | सूर्य    भवानी | भवानी    सूर्य | विष्णु    उमा |
| शिव | भवानी | विष्णु | गणेश | सूर्य |
| सूर्य    विष्णु | शिव    विष्णु | गणेश    शिव | शंकर    विष्णु | गणेश    शंकर |

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com